भाष्यानुक्तेः । ज्योतिषोक्ते पापाक्रान्तादिदुष्टलग्ने न० ।

**अलघु** त्रि० न लघुः विरोधे न०त० । लघुवर्णभिन्ने १गुरुवर्णे आकारादौ २गौरवयुक्ते लाघवशून्ये । "जवनमलघुपीवरोरुकृच्छ्रा" माघः २दीर्घे च "अलघुप्रसारितविलोचनाञ्जलिः" माघः । स्त्रियां वा ङीप् ।

**अलङ्करण** न०अलम्+कृ—भावे ल्युट् । १भूषायाम् । करणे ल्युट् । २वलयादौ भूषणे । "आवसथोन्मर्दनालङ्करणदन्तप्रक्षालनान्यध्वर्योरदीक्षितस्य" कात्या० ८,६,२८, । न चालङ्करणं धार्य्यं क्वचिद्देहे तया पुनः" विधवाधर्म्मे पुरा० ।

**अलङ्करिष्णु** त्रि० अलम् कृ—इष्णुच् । भूषके मण्डनकरणशीले । "अलङ्करिष्णवस्ते च शब्दमर्थं मुभौ त्रिधा" अग्निपु० ।

**अलङ्कर्त्तृ** त्रि०अलम्+कृ—तृच् । भूषणकर्त्तरि स्त्रियां ङीप् ।

**अलङ्कर्म्मीण** त्रि० अलं समर्थः कर्म्मणे ख । कर्म्मक्षमे ।

**अलङ्कार** पु०अलम्+कृ—भावे घञ् । १भूषायाम् । करणे घञ् । २हारादौ भूषणे,साहित्यविषयदोषगुणप्रतिपादके ३ग्रन्थे, ४शब्दभूषणे—अनुप्रासादौ, ५शब्दार्थभूषणे—उपमादौ च । "शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः । रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्" सा०द० उक्तम् शब्दार्थयोः शोभाकारित्वम् तल्लक्षणम् । ते च बहवः शब्दनिष्ठा अर्थनिष्ठाः उभयनिष्ठाश्च । तत्र जात्यादयः शब्दनिष्ठाः उपमादयोऽर्थनिष्ठाः पुनरुक्तवदाभासादय उभयनिष्ठाः तत्तदन्वयव्यतिरेकाभ्यां तथात्वम् शब्दनिष्ठास्तु बहवस्तेषु केचित् तत्तच्छब्दे उक्ताः केचित् वक्तव्याश्च तद्भेदास्तावत् समासेनात्राभिधीयन्ते तत्र जात्यादयश्चतुर्विंशतिः शब्दालङ्काराः सरस्वतीकण्ठाभरणे दर्शिताः यथा "ये व्युत्पत्त्यादिना शब्दानलङ्कर्त्तुमिह क्षमाः । शब्दालङ्कारसंज्ञास्ते ज्ञेयाजात्यादयोबुधैः" । "जातिर्गतीरीतिवृत्तिच्छायामुद्रोक्तियुक्तयः । भणितिर्गुम्फना शय्या पठितिर्यमकानि च । श्लेषानुप्रासचित्राणि वाकोवाक्यं प्रहेलिका । गूढप्रश्नोत्तराध्येयश्रव्यप्रेक्ष्याभिनीतयः । चतुर्विंशतिरित्युक्ताः शब्दालङ्कारजातयः" । तेषां लक्षणादीनि क्रमेण यथा तत्र

१जातिः "तत्र संस्कृतमित्यादिर्भारती जातिरिष्यते । सा त्वौचित्यादिभिर्व्वाचामलङ्काराय जायते संस्कृतेनैव केऽप्याहुः प्राकृतेनैव केचन । साधारण्यादिभिःकेचित् केचन म्लेच्छभाषया । न म्लेच्छितव्यं यज्ञादौ स्त्रीषु नाप्राकृतं वदेत् । संकीर्णे नाभिजातेषु नाप्रबुद्धेषु संस्कृतम् । देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः । पैशाचाद्यं पिशाचाद्या मगधं हीनजातयः । संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः । शक्योरचयितुं कश्चिदपभ्रंशेन जायते" । तत्र जातिरपि षोढ़ा यथोक्तं तत्रैव । "शुद्धा साधारणी मिश्रा सङ्कीर्णा रम्यगामिनी । अपभ्रष्टेति साचार्य्यैर्जातिः षोढा निगद्यते" । इति जातिः १

२ गतिः । "गद्यं पद्यं च मिश्रं च वाक्यं यत् सा गतिः स्मृता । अर्थौचित्यादिभिः साऽपि वागलङ्कार इष्यते । कश्चिद्गद्येन पद्येन कश्चिन्मिश्रेण शक्यते । कश्चिदेकेन च द्वाभ्यां काव्येऽर्थः कश्चन त्रिभिः । द्रुता विलम्बिता मध्या साथ द्रुतविलम्बिता । द्रुतमध्या च विज्ञेया तथा मध्यविलम्बिता । सा लघूनां गुरूणाञ्च बाहुल्याल्पत्वमिश्रणैः । गद्ये पद्ये च मिश्रे च षट् प्रकारोऽपि जायते । तत्र वृत्तं च जातिश्च पद्यमाहुरथो पृथक् । समञ्चार्द्धसमं चेति विषमञ्च प्रचक्षते" । "वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेदिति" वृ०र० । 'गद्यमुत्कलिकाप्रायं पद्यगन्धीतिच द्विधा । द्विधैव गद्यपद्यादिभेदान्मिश्रमपीष्यते । ललितं निष्ठुरं चूर्णमाविद्धं चेति योऽपरः । विशेषः सतु गद्यस्थो रीतिवृत्त्योर्विशिष्यते" । गतिः २ ।

३ रीतिः यथा "वैदर्भ्यादिगतः पन्थाः काव्ये मार्ग इति स्मृतः । रीङ् गताविति धातोश्च व्युत्पत्त्या रीतिरुच्यते । वैदर्भी साथ पाञ्चाली गौड़ियावन्तिका तथा । लाटीया मागधी चेति षोढ़ा रीतिर्निगद्यते । तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता । विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते" । दर्पणे तु "माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते" लक्षिता । "समस्तपञ्चषपदामोजःकान्तिविवर्ज्जिताम् । मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः । समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् गौड़ीयेति विजानन्ति रीतिं रीतिविचक्षणाः । अन्तराले तु पाञ्चालीवैदर्भ्यो र्याऽवतिष्ठते । सावन्तिका समस्तैः स्याद् द्वित्रैस्त्रिचतुरैस्तथा । समस्तरीतिव्यामिश्रा लाटीया वृत्तिरिष्यते । पूर्व्वरीते रनिर्वाहे खण्डरीतिस्तु मागधी" । रीतिः ३ ।

४ वृत्तिः यथा । "या विकाशेऽथ विक्षेपे संकोचे विस्तरे तथा । चेतसो वर्त्तयित्री स्यात् सा वृत्तिः सापि षड्विधा । कौशिक्यारभटी चैव भारती सात्वती परा । मध्यमारभटी चैव तथा मध्यमकौशिकी । सुकुमारार्थसंदर्भा कौशिकी तासु कथ्यते । यातु प्रौढ़ार्थसंदर्भा वृत्तिरारभटी तु सा । कोमलप्रौढ़सन्दर्भा कोमलार्था च भारती । प्रौढ़ार्थकोमलप्रौढ़संदर्भां सात्वतीं विदुः । कोमलप्रौढसन्दर्भा या सा